শ্রীঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ৫

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্ৰীঃ
শ্ৰীমতে কৃষ্ণায পরব্ৰহ্মণে নমঃ
শ্ৰীমতে রামানুজায নমঃ

# ॥শ্ৰীমন্নারাযণীযম্ ॥

## দশক - ৫

*ৱিরাট্ পুরুষোতপত্তিপ্ৰকারৱৰ্ণনং*

ৱ্যক্তাৱ্যক্তমিদং ন কিঞ্চিদভৱতপ্ৰাকপ্ৰাকৃতপ্ৰক্ষযে
মাযাযাম্ গুণসাম্যরুদ্ধৱিকৃতৌ ত্ৱয্যাগতাযাং লযম্।
নো মৃত্যুশ্চ তদামৃতং চ সমভূন্নাহ্নো ন রাত্ৰেঃ স্থিতিঃ
তত্ৰৈকস্ত্ৱমশিষ্যথাঃ কিল পরানন্দপ্ৰকাশাত্মনা॥ ১ ॥

কালঃ কৰ্মগুণাশ্চ জীৱনিৱহা ৱিশ্ৱং চ কাৰ্যং ৱিভো
চিল্লীলারতিমেযুষি ত্ৱযি তদা নিৰ্লীনতামাযযুঃ।
তেষাং নৈৱ ৱদন্ত্যসত্ত্ৱমযি ভো শক্ত্যাত্মনা তিষ্ঠতাং
নো চেত্ কিং গগনপ্ৰসূনসদৃশাং ভূযো ভৱেতসংভৱঃ॥ ২ ॥

এৱং চ দ্ৱিপরাৰ্ধকালৱিগতা ৱীক্ষাং সিসৃক্ষাত্মিকাং
ৱিভ্ৰাণে ত্ৱযি চুক্ষুভে ত্ৰিভুৱনী ভাৱায মাযা স্ৱযম্।
মাযাতঃ খলু কালশক্তিরখিলাদৃষ্টং স্ৱভাৱোপি চ
প্ৰাদুৰ্ভূয গুণান্ৱিকাস্য ৱিদধুস্তস্যাসসহাযক্ৰিযাম্॥ ৩ ॥

মাযাসন্নিহিতোপ্ৰৱিষ্টৱপুষা সাক্ষীতি গীতো ভৱান্
ভেদৈস্তাং প্ৰতিবিংবতো ৱিৱিশিৱান্ জীৱোপি নৈৱাপরঃ।
কালাদিপ্ৰতিবোধিতাথ ভৱতা সংচোদিতা চ স্ৱযং
মাযা সা খলু বুদ্ধিতত্ত্ৱমসৃজদ্যোসৌ মহানুচ্যতে॥ ৪ ॥

তাত্ৰসৌ ত্ৰিগুণাত্মকোপি চ মহান্ সত্ত্ৱপ্ৰধানঃ স্ৱযং
জীৱেস্মিন্ খলু নিৰ্ৱিকল্পমহং ইত্যুদবোধনিষ্পাদকঃ।
চক্ৰেস্মিন্ সৱিকল্পবোধকমহন্তত্ত্ৱং মহান্ খলৱসৌ
সম্পুষ্টং ত্ৰিগুণৈস্তমোতিবহুলং ৱিষ্ণো ভৱতপ্ৰেরণাত্॥ ৫ ॥

সোঽহং চ ত্ৰিগুণক্ৰমাত্ ত্ৰিৱিধতামাসাদ্য ৱৈকাৰিকো
ভূয়স্তৈজসতামসাৱিতি ভৱন্নাদ্যেন সত্বাত্মনা।
দেৱানিন্দ্ৰিয়মানিনোঽকৃত দিশাৱাতাৰ্কপাশ্যশ্বিনো
ৱহ্নীন্দ্ৰাচ্যুতমিত্ৰকান্ ৱিধু ৱিধি শ্ৰীৰুদ্ৰ শাৰীৰকান্॥ ৬ ॥

ভূমন্মানসবুদ্ধ্যহঙ্কৃতিমিলচ্চিত্তাখ্যৱৃত্যন্বিতং
তচ্চান্তঃকৰণং ৱিভো তৱ বলাত্ সত্বাংশ এৱাসৃজত্।
জাতস্তৈজসতো দশেন্দ্ৰিয়গণস্তত্তামসাংশাৎপুন-
স্তন্মাত্ৰং নভসো মৰুৎপুৰপতে শব্দোঽজনি ত্বদবলাত্॥ ৭ ॥

শব্দাদ্ৱ্যোম ততঃ সসৰ্জিথ ৱিভো স্পৰ্শং ততো মাৰুতং
তস্মাদ্ৰূপমতো মহোঽথ চ ৰসং তোয়ং চ গন্ধং মহীম্।
এৱং মাধৱ পূৰ্ৱপূৰ্ৱকলনাদাদ্যাদ্যধৰ্মান্বিতং
ভূতগ্ৰামমিমং ত্বমেৱ ভগৱন্ প্ৰাকাশয়স্তামসাত্॥ ৮ ॥

এতে ভূতগণাস্তথেন্দ্ৰিয়গণা দেৱাশ্চ জাতা পৃথঙ্-
নো শেকুৰ্ভুৱনাণ্ডনিৰ্মিতিৱিধৌ দেৱৈৰমীভিস্তদা।
ত্বং নানাৱিধসূক্তিভিৰ্নুতগুণস্তত্বান্যমূন্যাৱিশং-
শ্চেষ্টাশক্তিমুদীৰ্য তানি ঘটয়ন্ হৈৰণ্যমণ্ডং ৱ্যধাঃ॥ ৯ ॥

অণ্ডং তৎখলু পূৰ্ৱসৃষ্টসলিলেঽতিষ্ঠত্ সহস্ৰং সমাঃ
নিৰ্ভিন্দন্নকৃথাশ্চতুৰ্দশজগদ্ৰূপং ৱিৰাডাহ্বয়ম্।
সাহস্ৰৈঃ কৰপাদমূৰ্ধনিৱহৈৰ্নিশ্শেষজীৱাত্মকো
নিৰ্ভাতোঽসি মৰুৎপুৰাধিপ স মাং ত্ৰায়স্ব সৰ্ৱামযাত্॥ ১০ ॥

★★★★★★★★★★